श्री सुब्रह्मण्य सहस्रनाम स्तोत्रं

ऋषय ऊचुः |
सर्वशास्त्रार्थतत्त्वज्ञ सर्वलोकोपकारक |
वयं चातिथयः प्राप्ता आतिथेयोऽसि सुव्रत || 1 ||

ज्ञानदानेन संसारसागरात्तारयस्व नः |
कलौ कलुषचित्ता ये नराः पापरताः सदा || 2 ||

केन स्तोत्रेण मुच्यंते सर्वपातकबंधनात् |
इष्टसिद्धिकरं पुण्यं दुःखदारिद्र्यनाशनं || 3 ||

सर्वरोगहरं स्तोत्रं सूत नो वक्तुमर्हसि |
श्रीसूत उवाच |
शृणुध्वं ऋषयः सर्वे नैमिशारण्यवासिनः || 4 ||

तत्त्वज्ञानतपोनिष्ठाः सर्वशास्त्रविशारदाः |
स्वयंभुवा पुरा प्रोक्तं नारदाय महात्मने || 5 ||

तदहं संप्रवक्ष्यामि श्रोतुं कौतूहलं यदि |
ऋषय ऊचुः |
किमाह भगवान्ब्रह्मा नारदाय महात्मने || 6 ||

सूतपुत्र महाभाग वक्तुमर्हसि सांप्रतं |
श्रीसूत उवाच |
दिव्यसिंहासनासीनं सर्वदेवैरभिष्टुतं || 7 ||

साष्टांगं प्रणिपत्यैनं ब्रह्माणं भुवनेश्वरं |
नारदः परिपप्रच्छ कृतांजलिरुपस्थितः || 8 ||

नारद उवाच |
लोकनाथ सुरश्रेष्ठ सर्वज्ञ करुणाकर |
षण्मुखस्य परं स्तोत्रं पावनं पापनाशनं || 9 ||

हे धातः पुत्रवात्सल्यात्तद्वद प्रणताय मे |
उपदिश्य तु मामेवं रक्ष रक्ष कृपानिधे || 10 ||

ब्रह्मोवाच |
शृणु वक्ष्यामि देवर्षे स्तवराजमिदं परं |
मातृकामालिकायुक्तं ज्ञानमोक्षसुखप्रदं || 11 ||

सहस्राणि च नामानि षण्मुखस्य महात्मनः |
यानि नामानि दिव्यानि दुःखरोगहराणि च || 12 ||

तानि नामानि वक्ष्यामि कृपया त्वयि नारद |
जपमात्रेण सिद्ध्यंति मनसा चिंतितान्यपि || 13 ||

इहामुत्र परं भोगं लभते नात्र संशयः |
इदं स्तोत्रं परं पुण्यं कोटियज्ञफलप्रदं |
संदेहो नात्र कर्तव्यः शृणु मे निश्चितं वचः || 14 ||

ॐ अस्य श्रीसुब्रह्मण्यसहस्रनामस्तोत्र महामंत्रस्य ब्रह्मा ऋषिः अनुष्टुप्छंदः सुब्रह्मण्यो देवता शरजन्माक्षय इति बीजं शक्तिधरोऽक्षय कार्तिकेय इति शक्तिः क्रौंचधर इति कीलकं शिखिवाहन इति कवचं षण्मुखाय इति ध्यानं श्रीसुब्रह्मण्य प्रसादसिद्ध्यर्थे जपे विनियोगः |

करन्यासः –
ॐ शं ओंकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय हृष्टचित्तात्मने भास्वररूपाय अंगुष्ठाभ्यां नमः |
ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय तर्जनीभ्यां नमः |
ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय मध्यमाभ्यां नमः |
ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय अनामिकाभ्यां नमः |
ॐ भं कंदर्पकोटिदीप्यमानाय द्विषड्बाहवे द्वादशाक्षाय कनिष्ठिकाभ्यां नमः |
ॐ वं खेटधराय खड्गिने शक्तिहस्ताय करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –
ॐ शं ओंकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय हृष्टचित्तात्मने भास्वररूपाय हृदयाय नमः |
ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय शिरसे स्वाहा |
ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय शिखायै वषट् |
ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय कवचाय हुं |

ॐ भं कंदर्पकोटिदीप्यमानाय द्विषड्बाहवे द्वादशाक्षाय नेत्रत्रयाय वौषट् |
ॐ वं खेटधराय खड्गिने शक्तिहस्ताय अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः |

ध्यानं |
ध्यायेत्षण्मुखमिंदुकोटिसदृशं रत्नप्रभाशोभितं
बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितं |
कर्णालंबितकुंडलप्रविलसद्गंडस्थलाशोभितं
कांचीकंकणकिंकिणीरवयुतं शृंगारसारोदयं || 1 ||

ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहं
खेटं कुक्कुटमंकुशं च वरदं पाशं धनुश्चक्रकं |
वज्रं शक्तिमसिं च शूलमभयं दोर्भिर्धृतं षण्मुखं
देवं चित्रमयूरवाहनगतं चित्रांबरालंकृतं || 2 ||

स्तोत्रं |
अचिंत्यशक्तिरनघस्त्वक्षोभ्यस्त्वपराजितः |
अनाथवत्सलोऽमोघस्त्वशोकोऽप्यजरोऽभयः || 1 ||

अत्युदारो ह्यघहरस्त्वग्रगण्योऽद्रिजासुतः |
अनंतमहिमाऽपारोऽनंतसौख्यप्रदोऽव्ययः || 2 ||

अनंतमोक्षदोऽनादिरप्रमेयोऽक्षरोऽच्युतः |
अकल्मषोऽभिरामोऽग्रधुर्यश्चामितविक्रमः || 3 ||

[* अतुलश्चामृतोऽघोरो ह्यनंतोऽनंतविक्रमः *]
अनाथनाथो ह्यमलो ह्यप्रमत्तोऽमरप्रभुः |
अरिंदमोऽखिलाधारस्त्वणिमादिगुणोऽग्रणीः || 4 ||

अचंचलोऽमरस्तुत्यो ह्यकलंकोऽमिताशनः |
अग्निभूरनवद्यांगो ह्यद्भुतोऽभीष्टदायकः || 5 ||

अतींद्रियोऽप्रमेयात्मा ह्यदृश्योऽव्यक्तलक्षणः |
आपद्विनाशकस्त्वार्य आढ्य आगमसंस्तुतः || 6 ||

आर्तसंरक्षणस्त्वाद्य आनंदस्त्वार्यसेवितः |
आश्रितेष्टार्थवरद आनंद्यार्तफलप्रदः || 7 ||

आश्चर्यरूप आनंद आपन्नार्तिविनाशनः |
इभवक्त्रानुजस्त्विष्ट इभासुरहरात्मजः || 8 ||

इतिहासश्रुतिस्तुत्य इंद्रभोगफलप्रदः |
इष्टापूर्तफलप्राप्तिरिष्टेष्टवरदायकः || 9 ||

इहामुत्रेष्टफलद इष्टदस्त्विंद्रवंदितः |
ईडनीयस्त्वीशपुत्र ईप्सितार्थप्रदायकः || 10 ||

ईतिभीतिहरश्चेड्य ईषणात्रयवर्जितः |
उदारकीर्तिरुद्योगी चोत्कृष्टोरुपराक्रमः || 11 ||

उत्कृष्टशक्तिरुत्साह उदारश्चोत्सवप्रियः |
उज्जृंभ उद्भवश्चोग्र उदग्रश्चोग्रलोचनः || 12 ||

उन्मत्त उग्रशमन उद्वेगघ्नोरगेश्वरः |
उरुप्रभावश्चोदीर्ण उमापुत्र उदारधीः || 13 ||

ऊर्ध्वरेतःसुतस्तूर्ध्वगतिदस्तूर्जपालकः |
ऊर्जितस्तूर्ध्वगस्तूर्ध्व ऊर्ध्वलोकैकनायकः || 14 ||

ऊर्जावानूर्जितोदार ऊर्जितोर्जितशासनः |
ऋषिदेवगणस्तुत्य ऋणत्रयविमोचनः || 15 ||

ऋजुरूपो ह्यृजुकर ऋजुमार्गप्रदर्शनः |
ऋतंभरो ह्यृजुप्रीत ऋषभस्त्वृद्धिदस्त्वृतः || 16 ||

लुलितोद्धारको लूतभवपाशप्रभंजनः |
एणांकधरसत्पुत्र एक एनोविनाशनः || 17 ||

ऐश्वर्यदश्चैंद्रभोगी चैतिह्यश्चैंद्रवंदितः |
ओजस्वी चौषधिस्थानमोजोदश्चौदनप्रदः || 18 ||

औदार्यशील औमेय औग्र औन्नत्यदायकः |
औदार्य औषधकर औषधं चौषधाकरः || 19 ||

अंशुमानंशुमालीड्य अंबिकातनयोऽन्नदः |
अंधकारिसुतोऽंधत्वहारी चांबुजलोचनः || 20 ||

अस्तमायोऽमराधीशो ह्यस्पष्टोऽस्तोकपुण्यदः |
अस्तामित्रोऽस्तरूपश्चास्खलत्सुगतिदायकः || 21 ||

कार्तिकेयः कामरूपः कुमारः क्रौंचदारणः |
कामदः कारणं काम्यः कमनीयः कृपाकरः || 22 ||

कांचनाभः कांतियुक्तः कामी कामप्रदः कविः |
कीर्तिकृत्कुक्कुटधरः कूटस्थः कुवलेक्षणः || 23 ||

कुंकुमांगः क्लमहरः कुशलः कुक्कुटध्वजः |
कुशानुसंभवः क्रूरः क्रूरघ्नः कलितापहृत् || 24 ||

कामरूपः कल्पतरुः कांतः कामितदायकः |
कल्याणकृत्क्लेशनाशः कृपाळुः करुणाकरः || 25 ||

कलुषघ्नः क्रियाशक्तिः कठोरः कवची कृती |
कोमलांगः कुशप्रीतः कुत्सितघ्नः कलाधरः || 26 ||

ख्यातः खेटधरः खड्गी खट्वांगी खलनिग्रहः |
ख्यातिप्रदः खेचरेशः ख्यातेहः खेचरस्तुतः || 27 ||

खरतापहरः स्वस्थः खेचरः खेचराश्रयः |
खंडेंदुमौलितनयः खेलः खेचरपालकः || 28 ||

खस्थलः खंडितार्कश्च खेचरीजनपूजितः |
गांगेयो गिरिजापुत्रो गणनाथानुजो गुहः || 29 ||

गोप्ता गीर्वाणसंसेव्यो गुणातीतो गुहाश्रयः |
गतिप्रदो गुणनिधिः गंभीरो गिरिजात्मजः || 30 ||

गूढरूपो गदहरो गुणाधीशो गुणाग्रणीः |
गोधरो गहनो गुप्तो गर्वघ्नो गुणवर्धनः || 31 ||

गुह्यो गुणज्ञो गीतिज्ञो गतातंको गुणाश्रयः |
गद्यपद्यप्रियो गुण्यो गोस्तुतो गगनेचरः || 32 ||

गणनीयचरित्रश्च गतक्लेशो गुणार्णवः |
घूर्णिताक्षो घृणिनिधिः घनगंभीरघोषणः || 33 ||

घंटानादप्रियो घोषो घोराघौघविनाशनः |
घनानंदो घर्महंता घृणावान् घृष्टिपातकः || 34 ||

घृणी घृणाकरो घोरो घोरदैत्यप्रहारकः |
घटितैश्वर्यसंदोहो घनार्थो घनसंक्रमः || 35 ||

चित्रकृच्चित्रवर्णश्च चंचलश्चपलद्युतिः |
चिन्मयश्चित्स्वरूपश्च चिरानंदश्चिरंतनः || 36 ||

चित्रकेलिश्चित्रतरश्चिंतनीयश्चमत्कृतिः |
चोरघ्नश्चतुरश्चारुश्चामीकरविभूषणः || 37 ||

चंद्रार्ककोटिसदृशश्चंद्रमौलितनूभवः |
छादितांगश्छद्महंता छेदिताखिलपातकः || 38 ||

छेदीकृततमःक्लेशश्छत्रीकृतमहायशाः |
छादिताशेषसंतापश्छुरितामृतसागरः || 39 ||

छन्नत्रैगुण्यरूपश्च छातेहश्छिन्नसंशयः |
छंदोमयश्छंदगामी छिन्नपाशश्छविश्छदः || 40 ||

जगद्धितो जगत्पूज्यो जगज्ज्येष्ठो जगन्मयः |
जनको जाह्नवीसूनुर्जितामित्रो जगद्गुरुः || 41 ||

जयी जितेंद्रियो जैत्रो जरामरणवर्जितः |
ज्योतिर्मयो जगन्नाथो जगज्जीवो जनाश्रयः || 42 ||

जगत्सेव्यो जगत्कर्ता जगत्साक्षी जगत्प्रियः |
जंभारिवंद्यो जयदो जगज्जनमनोहरः || 43 ||

जगदानंदजनको जनजाड्यापहारकः |
जपाकुसुमसंकाशो जनलोचनशोभनः || 44 ||

जनेश्वरो जितक्रोधो जनजन्मनिबर्हणः |
जयदो जंतुतापघ्नो जितदैत्यमहाव्रजः || 45 ||

जितमायो जितक्रोधो जितसंगो जनप्रियः |
झंझानिलमहावेगो झरिताशेषपातकः || 46 ||

झर्झरीकृतदैत्यौघो झल्लरीवाद्यसंप्रियः |
ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः || 47 ||

टंकारनृत्तविभवः टंकवज्रध्वजांकितः |
टंकिताखिललोकश्च टंकितैनस्तमोरविः || 48 ||

डंबरप्रभवो डंभो डंबो डमरुकप्रियः | [डमड्डु]
डमरोत्कटसन्नादो डिंभरूपस्वरूपकः || 49 ||

ढक्कानादप्रीतिकरो ढालितासुरसंकुलः |
ढौकितामरसंदोहो ढुंढिविघ्नेश्वरानुजः || 50 ||

तत्त्वज्ञस्तत्वगस्तीव्रस्तपोरूपस्तपोमयः |
त्रयीमयस्त्रिकालज्ञस्त्रिमूर्तिस्त्रिगुणात्मकः || 51 ||

त्रिदशेशस्तारकारिस्तापघ्नस्तापसप्रियः |
तुष्टिदस्तुष्टिकृत्तीक्ष्णस्तपोरूपस्त्रिकालवित् || 52 ||

स्तोता स्तव्यः स्तवप्रीतः स्तुतिः स्तोत्रं स्तुतिप्रियः |
स्थितः स्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः || 53 ||

स्थविष्ठः स्थविरः स्थूलः स्थानदः स्थैर्यदः स्थिरः |
दांतो दयापरो दाता दुरितघ्नो दुरासदः || 54 ||

दर्शनीयो दयासारो देवदेवो दयानिधिः |
दुराधर्षो दुर्विगाह्यो दक्षो दर्पणशोभितः || 55 ||

दुर्धरो दानशीलश्च द्वादशाक्षो द्विषड्भुजः |
द्विषट्कर्णो द्विषड्बाहुर्दीनसंतापनाशनः || 56 ||

दंदशूकेश्वरो देवो दिव्यो दिव्याकृतिर्दमः |
दीर्घवृत्तो दीर्घबाहुर्दीर्घदृष्टिर्दिवस्पतिः || 57 ||

दंडो दमयिता दर्पो देवसिंहो दृढव्रतः |
दुर्लभो दुर्गमो दीप्तो दुष्प्रेक्ष्यो दिव्यमंडनः || 58 ||

दुरोदरघ्नो दुःखघ्नो दुरारिघ्नो दिशां पतिः |
दुर्जयो देवसेनेशो दुर्ज्ञेयो दुरतिक्रमः || 59 ||

दंभो दृप्तश्च देवर्षिर्दैवज्ञो दैवचिंतकः |
धुरंधरो धर्मपरो धनदो धृतिवर्धनः || 60 ||

धर्मेशो धर्मशास्त्रज्ञो धन्वी धर्मपरायणः |
धनाध्यक्षो धनपतिर्धृतिमांधूतकिल्बिषः || 61 ||

धर्महेतुर्धर्मशूरो धर्मकृद्धर्मविद्ध्रुवः |
धाता धीमांधर्मचारी धन्यो धुर्यो धृतव्रतः || 62 ||

नित्योत्सवो नित्यतृप्तो निर्लेपो निश्चलात्मकः |
निरवद्यो निराधारो निष्कलंको निरंजनः || 63 ||

निर्ममो निरहंकारो निर्मोहो निरुपद्रवः |
नित्यानंदो निरातंको निष्प्रपंचो निरामयः || 64 ||

निरवद्यो निरीहश्च निर्दर्शो निर्मलात्मकः |
नित्यानंदो निर्जरेशो निःसंगो निगमस्तुतः || 65 ||

निष्कंटको निरालंबो निष्प्रत्यूहो निरुद्भवः |
नित्यो नियतकल्याणो निर्विकल्पो निराश्रयः || 66 ||

नेता निधिर्नैकरूपो निराकारो नदीसुतः |
पुलिंदकन्यारमणः पुरुजित्परमप्रियः || 67 ||

प्रत्यक्षमूर्तिः प्रत्यक्षः परेशः पूर्णपुण्यदः |
पुण्याकरः पुण्यरूपः पुण्यः पुण्यपरायणः || 68 ||

पुण्योदयः परं ज्योतिः पुण्यकृत्पुण्यवर्धनः |
परानंदः परतरः पुण्यकीर्तिः पुरातनः || 69 ||

प्रसन्नरूपः प्राणेशः पन्नगः पापनाशनः |
प्रणतार्तिहरः पूर्णः पार्वतीनंदनः प्रभुः || 70 ||

पूतात्मा पुरुषः प्राणः प्रभवः पुरुषोत्तमः |
प्रसन्नः परमस्पष्टः परः परिबृढः परः || 71 ||

परमात्मा परब्रह्म परार्थः प्रियदर्शनः |
पवित्रः पुष्टिदः पूर्तिः पिंगळः पुष्टिवर्धनः || 72 ||

पापहारी पाशधरः प्रमत्तासुरशिक्षकः |
पावनः पावकः पूज्यः पूर्णानंदः परात्परः || 73 ||

पुष्कलः प्रवरः पूर्वः पितृभक्तः पुरोगमः |
प्राणदः प्राणिजनकः प्रदिष्टः पावकोद्भवः || 74 ||

परब्रह्मस्वरूपश्च परमैश्वर्यकारणं |
परर्धिदः पुष्टिकरः प्रकाशात्मा प्रतापवान् || 75 ||

प्रज्ञापरः प्रकृष्टार्थः पृथुः पृथुपराक्रमः |
फणीश्वरः फणिवरः फणामणिविभूषणः || 76 ||

फलदः फलहस्तश्च फुल्लांबुजविलोचनः |
फडुच्चाटितपापौघः फणिलोकविभूषणः || 77 ||

बाहुलेयो बृहद्भूपो बलिष्ठो बलवान् बली |
ब्रह्मेशविष्णुरूपश्च बुद्धो बुद्धिमतां वरः || 78 ||

बालरूपो ब्रह्मगर्भो ब्रह्मचारी बुधप्रियः |
बहुश्रुतो बहुमतो ब्रह्मण्यो ब्राह्मणप्रियः || 79 ||

बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः |
बृहद्भानुतनूद्भूतो बृहत्सेनो बिलेशयः || 80 ||

बहुबाहुर्बलश्रीमान् बहुदैत्यविनाशकः |
बिलद्वारांतरालस्थो बृहच्छक्तिधनुर्धरः || 81 ||

बालार्कद्युतिमान् बालो बृहद्वक्षा बृहद्धनुः |
भव्यो भोगीश्वरो भाव्यो भवनाशो भवप्रियः || 82 ||

भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः |
भुक्तिमुक्तिप्रदो भोगी भगवान् भाग्यवर्धनः || 83 ||

भ्राजिष्णुर्भावनो भर्ता भीमो भीमपराक्रमः |
भूतिदो भूतिकृद्भोक्ता भूतात्मा भुवनेश्वरः || 84 ||

भावको भीकरो भीष्मो भावकेष्टो भवोद्भवः |
भवतापप्रशमनो भोगवान् भूतभावनः || 85 ||

भोज्यप्रदो भ्रांतिनाशो भानुमान् भुवनाश्रयः |
भूरिभोगप्रदो भद्रो भजनीयो भिषग्वरः || 86 ||

महासेनो महोदारो महाशक्तिर्महाद्युतिः |
महाबुद्धिर्महावीर्यो महोत्साहो महाबलः || 87 ||

महाभोगी महामायी मेधावी मेखली महान् |
मुनिस्तुतो महामान्यो महानंदो महायशाः || 88 ||

महोर्जितो माननिधिर्मनोरथफलप्रदः |
महोदयो महापुण्यो महाबलपराक्रमः || 89 ||

मानदो मतिदो माली मुक्तामालाविभूषणः |
मनोहरो महामुख्यो महर्धिर्मूर्तिमान्मुनिः || 90 ||

महोत्तमो महोपायो मोक्षदो मंगळप्रदः |
मुदाकरो मुक्तिदाता महाभोगो महोरगः || 91 ||

यशस्करो योगयोनिर्योगिष्ठो यमिनां वरः |
यशस्वी योगपुरुषो योग्यो योगनिधिर्यमी || 92 ||

यतिसेव्यो योगयुक्तो योगविद्योगसिद्धिदः |
यंत्रो यंत्री च यंत्रज्ञो यंत्रवान्यंत्रवाहकः || 93 ||

यातनारहितो योगी योगीशो योगिनां वरः |
रमणीयो रम्यरूपो रसज्ञो रसभावनः || 94 ||

रंजनो रंजितो रागी रुचिरो रुद्रसंभवः |
रणप्रियो रणोदारो रागद्वेषविनाशनः || 95 ||

रत्नार्ची रुचिरो रम्यो रूपलावण्यविग्रहः |
रत्नांगदधरो रत्नभूषणो रमणीयकः || 96 ||

रुचिकृद्रोचमानश्च रंजितो रोगनाशनः |
राजीवाक्षो राजराजो रक्तमाल्यानुलेपनः || 97 ||

राजद्वेदागमस्तुत्यो रजःसत्त्वगुणान्वितः |
रजनीशकलारम्यो रत्नकुंडलमंडितः || 98 ||

रत्नसन्मौलिशोभाढ्यो रणन्मंजीरभूषणः |
लोकैकनाथो लोकेशो ललितो लोकनायकः || 99 ||

लोकरक्षो लोकशिक्षो लोकलोचनरंजितः |
लोकबंधुर्लोकधाता लोकत्रयमहाहितः || 100 ||

लोकचूडामणिर्लोकवंद्यो लावण्यविग्रहः |
लोकाध्यक्षस्तु लीलावान्लोकोत्तरगुणान्वितः || 101 ||

वरिष्ठो वरदो वैद्यो विशिष्टो विक्रमो विभुः |
विबुधाग्रचरो वश्यो विकल्पपरिवर्जितः || 102 ||

विपाशो विगतातंको विचित्रांगो विरोचनः |
विद्याधरो विशुद्धात्मा वेदांगो विबुधप्रियः || 103 ||

वचस्करो व्यापकश्च विज्ञानी विनयान्वितः |
विद्वत्तमो विरोधिघ्नो वीरो विगतरागवान् || 104 ||

वीतभावो विनीतात्मा वेदगर्भो वसुप्रदः |
विश्वदीप्तिर्विशालाक्षो विजितात्मा विभावनः || 105 ||

वेदवेद्यो विधेयात्मा वीतदोषश्च वेदवित् |
विश्वकर्मा वीतभयो वागीशो वासवार्चितः || 106 ||

वीरध्वंसो विश्वमूर्तिर्विश्वरूपो वरासनः |
विशाखो विमलो वाग्मी विद्वान्वेदधरो वटुः || 107 ||

वीरचूडामणिर्वीरो विद्येशो विबुधाश्रयः |
विजयी विनयी वेत्ता वरीयान्विरजा वसुः || 108 ||

वीरघ्नो विज्वरो वेद्यो वेगवान्वीर्यवान्वशी |
वरशीलो वरगुणो विशोको वज्रधारकः || 109 ||

शरजन्मा शक्तिधरः शत्रुघ्नः शिखिवाहनः |
श्रीमान् शिष्टः शुचिः शुद्धः शाश्वतः श्रुतिसागरः || 110 ||

शरण्यः शुभदः शर्म शिष्टेष्टः शुभलक्षणः |
शांतः शूलधरः श्रेष्ठः शुद्धात्मा शंकरः शिवः || 111 ||

शितिकंठात्मजः शूरः शांतिदः शोकनाशनः |
षाण्मातुरः षण्मुखश्च षड्गुणैश्वर्यसंयुतः || 112 ||

षट्चक्रस्थः षडूर्मिघ्नः षडंगश्रुतिपारगः |
षड्भावरहितः षट्कः षट्छास्त्रस्मृतिपारगः || 113 ||

षड्वर्गदाता षड्ग्रीवः षडरिघ्नः षडाश्रयः |
षट्किरीटधरः श्रीमान् षडाधारश्च षट्क्रमः || 114 ||

षट्कोणमध्यनिलयः षंडत्वपरिहारकः |
सेनानीः सुभगः स्कंदः सुरानंदः सतां गतिः || 115 ||

सुब्रह्मण्यः सुराध्यक्षः सर्वज्ञः सर्वदः सुखी |
सुलभः सिद्धिदः सौम्यः सिद्धेशः सिद्धिसाधनः || 116 ||

सिद्धार्थः सिद्धसंकल्पः सिद्धसाधुः सुरेश्वरः |
सुभुजः सर्वदृक्साक्षी सुप्रसादः सनातनः || 117 ||

सुधापतिः स्वयंज्योतिः स्वयंभूः सर्वतोमुखः |
समर्थः सत्कृतिः सूक्ष्मः सुघोषः सुखदः सुहृत् || 118 ||

सुप्रसन्नः सुरश्रेष्ठः सुशीलः सत्यसाधकः |
संभाव्यः सुमनाः सेव्यः सकलागमपारगः || 119 ||

सुव्यक्तः सच्चिदानंदः सुवीरः सुजनाश्रयः |
सर्वलक्षणसंपन्नः सत्यधर्मपरायणः || 120 ||

सर्वदेवमयः सत्यः सदा मृष्टान्नदायकः |
सुधापी सुमतिः सत्यः सर्वविघ्नविनाशनः || 121 ||

सर्वदुःखप्रशमनः सुकुमारः सुलोचनः |
सुग्रीवः सुधृतिः सारः सुराराध्यः सुविक्रमः || 122 ||

सुरारिघ्नः स्वर्णवर्णः सर्पराजः सदा शुचिः |
सप्तार्चिर्भूः सुरवरः सर्वायुधविशारदः || 123 ||

हस्तिचर्मांबरसुतो हस्तिवाहनसेवितः |
हस्तचित्रायुधधरो हृताघो हसिताननः || 124 ||

हेमभूषो हरिद्वर्णो हृष्टिदो हृष्टिवर्धनः |
हेमाद्रिभिद्धंसरूपो हुंकारहतकिल्बिषः || 125 ||

हिमाद्रिजातातनुजो हरिकेशो हिरण्मयः |
ह्रद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः || 126 ||

हिरण्यवर्णो हितकृद्धर्षदो हेमभूषणः |
हरप्रियो हितकरो हतपापो हरोद्भवः || 127 ||

क्षेमदः क्षेमकृत्क्षेम्यः क्षेत्रज्ञः क्षामवर्जितः |
क्षेत्रपालः क्षमाधारः क्षेमक्षेत्रः क्षमाकरः || 128 ||

क्षुद्रघ्नः क्षांतिदः क्षेमः क्षितिभूषः क्षमाश्रयः |
क्षालिताघः क्षितिधरः क्षीणसंरक्षणक्षमः || 129 ||

क्षणभंगुरसन्नद्धघनशोभिकपर्दकः |
क्षितिभृन्नाथतनयामुखपंकजभास्करः || 130 ||

क्षताहितः क्षरः क्षंता क्षतदोषः क्षमानिधिः |
क्षपिताखिलसंतापः क्षपानाथसमाननः || 131 ||

उत्तर न्यासः |
करन्यासः –
ॐ शं ओंकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय हृष्टचित्तात्मने भास्वररूपाय अंगुष्ठाभ्यां नमः |
ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय तर्जनीभ्यां नमः |
ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय मध्यमाभ्यां नमः |
ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय अनामिकाभ्यां नमः |
ॐ भं कंदर्पकोटिदीप्यमानाय द्विषड्बाहवे द्वादशाक्षाय कनिष्ठिकाभ्यां नमः |
ॐ वं खेटधराय खड्गिने शक्तिहस्ताय करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –
ॐ शं ओंकारस्वरूपाय ओजोधराय ओजस्विने सुहृदयाय हृष्टचित्तात्मने भास्वररूपाय हृदयाय नमः |
ॐ रं षट्कोणमध्यनिलयाय षट्किरीटधराय श्रीमते षडाधाराय शिरसे स्वाहा |
ॐ वं षण्मुखाय शरजन्मने शुभलक्षणाय शिखिवाहनाय शिखायै वषट् |
ॐ णं कृशानुसंभवाय कवचिने कुक्कुटध्वजाय कवचाय हुं |
ॐ भं कंदर्पकोटिदीप्यमानाय द्विषड्बाहवे द्वादशाक्षाय नेत्रत्रयाय वौषट् |
ॐ वं खेटधराय खड्गिने शक्तिहस्ताय अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्विमोकः |

फलश्रुति |
इति नाम्नां सहस्राणि षण्मुखस्य च नारद |
यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा || 1 ||

स सद्यो मुच्यते पापैर्मनोवाक्कायसंभवैः |
आयुर्वृद्धिकरं पुंसां स्थैर्यवीर्यविवर्धनं || 2 ||

वाक्येनैकेन वक्ष्यामि वांछितार्थं प्रयच्छति |
तस्मात्सर्वात्मना ब्रह्मन्नियमेन जपेत्सुधीः || 3 ||

इति स्कंदपुराणे ईश्वरप्रोक्ते ब्रह्मनारदसंवादे श्री सुब्रह्मण्य सहस्रनाम स्तोत्रं |